श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

॥ प्रस्तावपद्धतिः प्रथमा ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

॥ प्रस्तावपद्धतिः प्रथमा ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सन्तः श्रीरङ्गपृथ्वीशचरणत्राणशेखराः।
जयन्ति भुवनत्राणपदपङ्कजरेणवः ॥ **1.1** ॥

भरताय परं नमोऽस्तु तस्मै
प्रथमोदाहरणाय भक्तिभाजाम्।
यदुपज्ञमशेषतः पृथिव्यां
प्रथितो राघवपादुकाप्रभावः ॥ **1.2** ॥

वर्णस्तोमैर्वकुळसुमनोवासनामुद्वहन्तीम्
आम्नायानां प्रकृतिमपरां संहितां दृष्टवन्तम्।
पादे नित्यप्रणिहितधियं पादुके रङ्गभर्तुः
त्वन्नामानं मुनिमिह भजे त्वामहं स्तोतुकामः ॥ **1.3** ॥

दिव्यस्थानात् त्वमिव जगतीं पादुके गाहमाना
पादन्यासं प्रथममनघा भारती यत्र चक्रे।
योगक्षेमं सकलजगतां त्वय्यधीनं स जानन्
वाचं दिव्यां दिशतु वसुधाश्रोत्रजन्मा मुनिर्मे ॥ **1.4** ॥

नीचेऽपि हन्त मम मूर्धनि निर्विशेषं
तुङ्गेऽपि यन्निविशते निगमोत्तमाङ्गे।

प्राचेतसप्रभृतिभिः प्रथमोपगीतं
    स्तोष्यामि रङ्गपतिपादुकयोर्युगं तत् ॥ **1.5** ॥

धत्ते मुकुन्दमणिपादुकयोर्निवेशात्
    वल्मीकसम्भवगिरा समतां ममोक्तिः।
गङ्गाप्रवाहपतितस्य कियानिव स्यात्
    रथ्योदकस्य यमुनासलिलाद्विशेषः ॥ **1.6** ॥

विज्ञापयामि किमपि प्रतिपन्नभीतिः
    प्रागेव रङ्गपतिविभ्रमपादुके त्वाम्।
व्यङ्क्तुं क्षमास्सदसती विगताभ्यसूयाः
    सन्तः स्पृशन्तु सदयैर्हृदयैः स्तुतिं ते ॥ **1.7** ॥

अश्रद्दधानमपि नन्वधुना स्वकीये
    स्तोत्रे नियोजयसि मां मणिपादुके त्वम्।
देवः प्रमाणमिह रङ्गपतिस्तथात्वे
    तस्यैव देवि पदपङ्कजयोर्यथा त्वम् ॥ **1.8** ॥

यदाधारं विश्वं गतिरपि च यस्तस्य परमा
    तमप्येका धत्से दिशसि च गतिं तस्य रुचिराम्।
कथं सा कंसारेर्द्रुहिणहरदुर्बोधमहिमा
    कवीनां क्षुद्राणां त्वमसि मणिपादु स्तुतिपदम् ॥ **1.9** ॥

श्रुतप्रज्ञासम्पन्महितमहिमानः कतिकति
    स्तुवन्ति त्वां सन्तः श्रुतिकुहरकण्डूहरगिरः।
अहं त्वल्पस्तद्वद्यदिह बहु जल्पामि तदपि
    त्वदायत्तं रङ्गक्षितिरमणपादावनि ! विदुः ॥ **1.10** ॥

यदेष स्तौमि त्वां त्रियुगचरणत्रायिणि ! ततो
    महिम्नः का हानिस्तव मम तु सम्पन्निरवधिः।

शुना लीढा कामं भवतु सुरसिन्धुर्भगवती
तदेषा किम्भूता स तु सपदि सन्तापरहितः ॥ **1.11** ॥

मितप्रेक्षालाभक्षणपरिणमत्पञ्चषपदा
मदुक्तिस्त्वय्येषा महितकविसंरम्भविषये।
न कस्येयं हास्या हरिचरणधात्रि ! क्षितितले
मुहुर्वात्याधूते मुखपवनविष्फूर्जितमिव ॥ **1.12** ॥

निस्सन्देहनिजापकर्षविषयोत्कर्षोऽपि हर्षोदय -
प्रत्यूढक्रमभक्तिवैभवभवद्वैयात्यवाचालितः।
रङ्गाधीशपदत्रवर्णनकृतारम्भैर्निगुम्भैर्गिरां
नर्मास्वादिषु वेङ्कटेश्वरकविर्नासीरमासीदति ॥ **1.13** ॥

रङ्गक्ष्मापतिरत्नपादु ! भवतीं तुष्टूषतो मे जवात्
जृम्भन्तां भवदीयशिञ्जितसुधासन्दोहसन्देहदाः।
श्लाघाघूर्णितचन्द्रशेखरजटाजङ्गालगङ्गापयः
त्रासादेशविशृङ्खलप्रसरणोत्सिक्ताः स्वयं सूक्तयः ॥ **1.14** ॥

हिमवन्नळसेतुमध्यभाजां
भरताभ्यर्चितपादुकावतंसः।
अतपोधनधर्मतः कवीनाम्
अखिलेष्वस्मि मनोरथेष्वबाह्यः ॥ **1.15** ॥

अनिदम्प्रथमस्य शब्दराशेः
अपदं रङ्गधुरीणपादुके ! त्वाम्।
गतभीतिरभिष्टुवन् विमोहात्
परिहासेन विनोदयामि नाथम् ॥ **1.16** ॥

वृत्तिभिर्बहुविधाभिराश्रिता
वेङ्कटेश्वरकवेः सरस्वती।

अद्य रङ्गपतिरत्नपादुके !
    नर्तकीव भवतीं निषेवताम् ॥ **1.17** ॥

अपारकरुणाम्बुधेस्तव खलु प्रसादादहं
    विधातुमपि शक्नुयां शतसहस्रिकां संहिताम्।
तथापि हरिपादुके ! तव गुणौघलेशस्थितेः
    उदाहृतिरियं भवेदिति मिताऽपि युक्ता स्तुतिः ॥ **1.18** ॥

अनुकृतनिजनादां सूक्तिमापादयन्ती
    मनसि वचसि च त्वं सावधाना मम स्याः।
निशमयति यथासौ निद्रया दूरमुक्तः
    परिषदि सह लक्ष्म्या पादुके ! रङ्गनाथः ॥ **1.19** ॥

त्वयि विहिता स्तुतिरेषा पदरक्षिणि ! भवति रङ्गनाथपदे।
तदुपरि कृता सपर्या नमतामिव नाकिनां शिरसि ॥ **1.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे प्रस्तावपद्धतिः प्रथमा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥